## ।। अथ अष्टादशोऽध्याय: ।। Chapter - 18

ततो गच्छेन्महाराज देवीं सर्वार्थसिद्धिदाम्।
त्रिषु लोकेषु विख्यातां कृणाविमिति प्रभो ।। १

त्र्यम्बकस्य सरस: कुलमुत्तरमाश्रिताम् ।
यस्या: संदर्शनादेव नर: पापात् प्रमुच्यते ।। २

पुरासीत्कृणो नाम ब्राह्मण: शास्त्रवित्तम: ।
शान्तो दान्त:शुचिर्धीमान् तपस्वी वाग्विदां वर: ।। ३

वने तपस्यतस्तस्य सुवर्णं गिरिसन्निधौ ।
कुलमुत्सादितं सर्वं राक्षसै: क्रूरकर्मभि: ।
मच्छापपरिभूतस्य सौदासस्यानुगामिभि:।। ४

सन्निरीक्ष्य द्विजश्रेष्ठो राक्षसैर्भक्षितान् सुतान् ।
बन्धून् भ्रातृन् सपत्नीकान् विललाप सुदु:खित: ।। ५

-0-

ई १ बी वरणाविमति प्रभाम्
ई १ खिता:
ए(२) क्रुरकर्मभि:
ए(१) शुचिर्धिमान्

कृष्ण उवाच : इमे दारा: सुताश्चेमे भ्रातरो बान्धवाश्च ये ।
राक्षसैर्भक्षिता: सर्वे क्रोशन्त: पश्यतो मम ।। ६

नास्ति शास्ता द्विजेन्द्राणां त्रिषु लोकेषु कश्चन ।
न धर्मो विद्यते नूनं न चास्ति तपसां फलम् ।।
यत्र मे राक्षसैर्दुष्टै: कुलच्छेद: कृतोऽधुना ।। ७

किं करोमि क्व गच्छामि कस्य वा कथयाम्यहम् ।
राक्षसेभ्य: परित्रातुं शक्ति: कस्यापि नास्त्युत ।। ८

अनेनापि गिरीन्द्रेण पार्श्वे निवसत: सदा ।
जंगमां मूर्तिमास्थाय न त्राणं विहितं मम ।। ९

एते वै देवतात्मान: श्रूयन्ते भुवि पर्वता: ।।
धारयन्ति महीं कृत्स्नामिमां सागरमेखलाम् ।। १०

तस्माच्छापं प्रदास्यामि द्विजानत्रायतो गिरे: ।। ११

-0-0-

१ ई सी डी मे
२ ई स: फलम्
१ ए त्रिषु लोकेषु

(ए २) चास्ति
(ए ३) राक्षसेभ्य:
(ए ४) णा

वसिष्ठ उवाच :इत्युक्त्वा स द्विजो राजन् वरूणो मुनिपुंगव: ।
क्रुद्ध: शशाप तं शैलं सुवर्णाख्यं मनोहरम् ।। १२

वरूण उवाच :- हन्तस्वर्णगिरे विप्रानुपान्ते शरणं गतान् ।
नाभिरक्षसि रक्षोभ्य: शृणु तस्माद्वचो मम ।। १३

उत्पत्स्यन्ते न तरव: फलपुष्पान्वितास्त्वयि ।
एते सर्वेऽपि सुज्ञा: शीर्षा यास्यन्ति निष्फरा: ।। १४

स्नुहिप्रायाणि शृंगाणि स्थलप्राया नितम्बभू: ।
भविष्यंति न सन्देहो वचनान्मे शिलोच्चय ।। १५

वसिष्ठ उवाच :- इति दत्वा मुनि: शापं श्रीमाले स महातपा: ।
तत्र संस्कृतवान् बन्धून् शोचन् राक्षसभक्षितान् ।। १६

तदाप्रभृति भूपाल स सुवर्णाख्यो नगोत्तम: ।
वृत: कंटकिभिर्वृक्षै: स्नुहिमात्रैरजायत ।। १७

-
0
-

शुष्काणि निर्झराम्भांसि भूमिजाता बहुस्थला ।
परित्यज्याथ तं देशं वरुणो दुःखविह्वलः ॥

श्रीमालं पुनरेवासौ तपस्तप्तुमुपागमत् ॥ १८

तत्र वैयम्बकं प्राप्य सरस्तीरमनोहरम्[1] ।
ददर्श भ्रातृपुत्राधैः[2] सम्वृतान् परितो मुनीन् ॥ १९

तपः स्वाध्यायनिरतान् वल्कलाजिनवाससः ।
ततः स्मृतसुहृत्पुत्रो व्यलपद्वरुणः पुनः ॥ २०

वरुण उवाच — क्व मे शिष्याः क्व मे पुत्राः क्व दाराः क्व च बान्धवाः ।
अहमासं मुदा युक्तः सम्वृतो यैस्तपोवने ॥ २१

स्विन्नाङ्गमग्निशालायामात्मनश्चारिभिः ।
न पश्यामि स्वमद्याहं वीज्यमानं पटाञ्चलैः ॥ २२

बाहूनुदाधूयमानानां[२१] शिरांसि च तपस्विनाम् ॥
गात्राणि मम बन्धूनां भक्षितानि निशाचरैः[3] ॥ २३

-o-

१ ई रस्तीरमनो
२ ई पुत्रोघः
३ ई निशाचरो

(ए१) क्षौ

ई सी १
अथ शून्यामिमामुर्वी पश्यामि सवनाचलाम् ।
विना तान् प्रियम्भाषान् प्रियबन्धुसुहृत्सुतान् ।। २४

अहो दुष्कृतसंसार: कृतो य: पूर्वजन्मनि ।
येन पूर्णं ममाद्यापि हृदयं विदीर्यते ।। २५

एको नार्हति गार्हस्थ्यमेको नार्हति सत्क्रियाम् ।।
सञ्चिनोति न चैकोऽर्थानेको याति पराजयम् ।। २६

सोऽहमेक: कृतो हन्त दैवेनाद्य दुरात्मना ।
क्व गन्तास्मि भृशं दीन: शोकव्याकुलचेतन ।। २७

इत्थं विलपतस्तस्य मुनयो दीर्घदर्शिन: ।
आश्वास्य कृपयाविष्टा वचनं प्रत्यबोधयन् ।। २८

मुनयऊचु: मा विषीद मुनिश्रेष्ठ सर्वशास्त्र विशारद ।
गतागतं यतो लोके सर्वे कुर्वन्ति जन्तव: ।। २९

-०-०-

ई १ सी अथ
ए १ व्याकुलचेतन

(ए१) च्वलां
(ए२) हन्त

न देहस्यात्मनः किंचिन्न देहस्यतथात्मनि ।
लोहभ्रामकसम्बन्धमेतयोर्विद्धि सत्तम ।। ३०

वस्तुजातमिदं नास्ति प्रेक्ष्यमाणमपि द्विज ।।
मृगतृष्णाजलानीव चित्तभ्रान्तिनिबन्धनम् ।। ३१

आहाराय विहंगस्य कुलायं त्यजतो यथा ।।
लीला तथाऽऽत्मनो देहं विहायान्यत्र गच्छतः ।। ३२

बहिरिन्द्रियसंगीनि वस्तूनि शतशो बहिः ।
नात्मानं तानि पश्यन्ति तत्कः शोकस्तदत्यये ।। ३३

यथा[1] लीढं श्वभिः पात्रं सद्भिर्दूरे निरस्यते ।
इन्द्रियैर्दूषितं देहं मुनिश्रेष्ठ तथात्मना[2] ।। ३४

नात्मनो देहसंगोऽस्ति न प्राप्तिः सुखदुःखयोः[3] ।।
वयोऽवस्थाश्रमो नैव न च दाराः कुतश्चन ।। ३५

-०-०-

१ सी यावन्न
२ ई मनः
३ ई दुःखयोः

उत्पद्यन्ते विनाशाय सर्वे जगति जन्तव: ।
नाशं तेषामत: पश्यन् शोकं कुर्यान्न पण्डित: ।। ३६

यं विषादोऽभिभवति विषमे समुपस्थिते ।
तेजसा तस्य हीनस्य पुरुषार्थो न विद्यते ।। ३७

तस्माद्धर्मार्जिने यत्नं दिवारात्रमतन्द्रित: ।
कुरु होमैर्जपैर्दानै वेदाभ्यासेन च प्रभो ।। ३८

वसिष्ठ उवाच :- इत्याश्वास्य द्विजश्रेष्ठा: सर्वे जग्मुर्यथागतम् ।
वरुणोऽपि द्विजो राजंस्तदा शोकममुंचत ।। ३९

आश्वस्तश्चिन्तयामास कथं पुत्रो भवेदिति ।
कुलच्छेदोऽतिदु:खाय पितॄणां स्यादिति श्रुति: ।। ४०

अथ त्र्यम्बकतीर्थादुत्तरस्यां महत्तप: ।
कुर्वन्नाराधयिष्येऽहं देवीं त्रिभुवनेश्वरीम् ।। ४१

-०-

ई बी १ अत्र

(ए१) महत्तत:

इति कृत्वा मतिं देवो वरुणो नृपसत्तम[1] ।
चकार स्थंडिलं चारु विशालं वालुकामयम् ।। ४२

अथ त्र्यम्बके तीर्थे स्नात्वा सन्तर्प्य देवता: ।
आगमोक्तैर्महामन्त्रैस्तत्र देवीं न्यवेशयत् ।। ४३

स्वयं शीर्णानि पत्राणि गृहीत्वा स परेऽहनि ।
अश्नाति वरुणो राजंस्त्रिकालं स्नानमाचरन् ।। ४४

चत्वारो वार्षिका मासा व्यपक्रान्ता महात्मन: ।
एवं तपस्यतस्तस्य ततोऽभूच्छिशिरोदय: ।। ४५

जलाहारपरो नित्यमत्यक्राम तानपि ।
निराहारोऽथ नैदाघं मुनि: कालमकालयत् ।। ४६

पुन: प्राप्तासु वर्षासु प्राणरोधं विधाय वै ।
तप्यमानस्य दीनस्य शरत्काल: किलाययौ ।। ४७

--०--

१ ई विकार

(ए१) न्टपसत्तम्

पुष्पैः गन्धैः तथा धूपैः वन्यैः मूलफलैरपि ।।
स्तवैर्ध्यानैर्जपैर्होमैर्देवीमाराधयच्चिरम् ।। ४८

अथाश्विनस्य मासस्य शुक्लपक्षे द्विजन्मन: ।।
कृपया परमा देवी प्रत्यक्षाभून् महेश्वरी ।। ४९

सूर्यकोटिप्रतीकाशा श्वेतरूपधरा तथा ।।
विशाललोचना देवी स्फुरत्कोटीरकुण्डला ।। ५०

त्रिभ्राणा स्थविरं रूपं पलिताक्रान्तमस्तका ।।
स्थण्डिलोपरिविन्यस्तां पुष्पपूजामुदस्य वै ।। ५१

मध्याद्विनिर्ययौ राजन देवी भक्तार्तिहारिणी ।।
जगन्मातरमीक्षित्वा तुष्टाव करुणो द्विज: ।। ५२

करुणा उवाच:- प्रसन्नवदनांभोजे ध्रुवदेवि परापरे ।
तुभ्यं शुंभासुरहरे नमो देवि जगन्मये ।। ५३

-o-

१ सी नरेश्वर ई भूनरेश्वर:
२ ई रूपंपलिताक्रातमस्तका ।
श्लोक: विशाल लोचना देवीस्फुर त्कोरी कुण्डला
त्रिभ्राणास्थविरंरूपंपलिताक्रान्तमस्तका

(ए१) दृष्ट्वाथतांजगन्माता

यथाव्याप्तमिदं विश्वमात्मशक्त्या चराचरं ।
स्तोष्यामि तामहं केन विशेषणेन किंचन ।। ५४

महात्यये तुरव्यग्रं दंष्ट्रा कोटिगतं जगत् ।
~~निर्बर्हिणे~~ व्यावृत्य प्रकृतिं नीतं त्वया दुष्टनिबर्हिणि[1] ।। ५५

त्वमेतत् सर्वभूतानां देवानां त्राणकारिणी ।।
आर्तानां शरणं देवि त्रैलोक्ये सचराचरे ।। ५६

त्वयैकार्णवसम्भूते मधुकैटभमर्दिनि ।।
हरिं प्रबोध्य सहसा त्रातः किल पितामहः ।। ५७

प्रबुद्धकनकाम्भोजत्वन्नेत्रकिरणामृतैः[2]
सिक्ता देवि न बाध्यन्ते नराः पापशतैरपि ।। ५८

न चिन्ता वांछितार्थेषु तेषां मनसि जायते ।
येषां सर्वार्थ ~~[illegible]~~ जननी देवि त्वं ध्यानगोचरा ।। ५९

-०-

१ निर्बर्हिणी

(ए१) निबर्हिणं

(ए२) किरणा मृतैः

(ए३) प्रभवा

गृहेषु तेषु शर्वाणि न शोकः कुरुते पदम्।
मंगलायतनं मातः पूज्यसे यत्र मानवैः ।। ६०

कौपीनमात्रवासोभिः स्वकरैरर्चितासि यैः ।
दुकूलपरिधानास्ते यजन्ते विविधैर्मखैः ।। ६१

इच्छाशक्तिमयी मातः परस्य परमेष्ठिनः ।।
जगत्त्रि[1]तयरूपेण त्वमेकैव विजृम्भसे ।। ६२

न त्वां विना विधिः स्त्रष्टुं शक्तस्त्रातुं न चाच्युतः ।
न संहर्तुं महेशानो जगन्ति जगतां प्रिये ।। ६३

इह त्रिलिंगनिर्देश्यं यत्किंचिदपि विद्यते ।
सकलं तत्त्वमेवैका व्याप्य विश्वं व्यवस्थिता ।। ६४
वन्ध्यानां पुत्रदासित्वं भर्त्तदा बालसुभुवाम्
पत्नी[2]प्रदा कुमाराणां दरिद्राणां च वित्तदा ।। ६५

सोऽहं हतसुहृत्पुत्रस्त्वामम्ब शरणं गतः ।
त्राहि मां भक्तिसंयुक्तमंघ्रिपंकजसंगतम् ।। ६६

-o-

१ ए जगत्त्रि
(ए१) जगत्त्रयरूपेण त्वमेवैकविजृम्भसे ।
(ए२) पत्नि

श्री देव्युवाच :- वरं वरय भद्रं ते यत्सुरैरपि दुर्लभम् ।
परितुष्टा प्रदास्यामि भक्ताय द्विजवर्य ते ।। ६७

वरुण उवाच :- राक्षसैर्भक्षितं देवि कुलं मम सुरेश्वरि ।
जरया जीर्णदेहस्य कथं तन्मे कुलोदय: ।। ६८

श्री देव्युवाच :- पुत्रस्य ते कनिष्ठस्य पत्नी राक्षसशंकया ।
गिरिकन्दरमध्यास्ते तस्या गर्भोऽस्ति निश्चतम् ।। ६९

पतिशोकसमाक्रान्ता बन्धुस्वजनवर्जिता ।
क्लिश्यमाना सगर्भा सा दु:खं जीवति पर्वते ।। ७०

द्वाभ्यामनन्तरं विप्र मासाभ्यां वेदवित्तम ।।
प्रसविष्यति सा पुत्रं नात्र कार्या विचारणा ।। ७१

इदं श्रीमालमासाद्य सर्वतीर्थमयं शुभम् ।।
स्थितिं ब्रह्मन् करिष्यामि यावदायाति सप्लव: ।। ७२

-०-

(ए१) यावदाहूतसंप्लवम्

वरुण उवाच :- यदि तुष्टासि मे देवि स्थातव्यमिह वैत्वया ।
तदम्ब मम नाम्ना वै विश्रुता भव भूतले ॥ ७३

श्री देव्युवाच :- वरुणं वीक्ष्य[१] दुःखार्तमाविर्भूताऽस्मि यद्भुवि ॥
वरुणाबिरिति ख्यातं नाम तन्मे भविष्यति ॥ ७४

श्रीमालवासिनां[२] भक्त्या तुष्टा दास्यामि वांछितम्।
पुत्रान् दास्याम्यपुत्राणां कन्यानां च पतीं स्तथा ॥ ७५

ये माघस्य सिताष्टम्यां चैत्रस्याश्वयुजस्य वा[१] ।
अर्चयिष्यन्ति बलिभिस्ते भविष्यन्ति भूभुजः ॥ ७६

वसिष्ठ उवाच :- इति दत्वा वरं देवी प्रेषयामास तं द्विजम्।
यत्रास्तेऽद्रितटान्ते[२] सा लीना भीता द्विजस्नुषा ॥ ७७

गत्वा द्विजोऽपि तत्राशु सोत्साहहृदयो नृप ॥
आश्वासयत तामार्तां पतिशोकानुगां स्नुषाम् ॥ ७८

-o-

१ बी च

२ बी यत्रास्ते द्रितटान्तेसा ई यत्रास्तेद्विक्याटांतलिनाभीताद्विज

श्लोक

सगर्भा तामुपादाय वरूणो द्विजसत्तम: ।
श्रीमाले न्यवसद्देवीं वरूणावीमुपासितुम् ।। ७९

ततो देव्या यथोद्दिष्टे काले तस्य स्नुषा नृप ।।
प्रयताजनयत् पुत्रं गुणाज्ञं पुण्यलक्षणम् ।। ८०

ततस्तस्य द्विजेन्द्रस्य द्विजै: श्रीमालवासिभि: ।
आगत्य सदनं हृष्टै: पुत्रनामकृतं नृप ।। ८१

द्विजा ऊचु:- भविता पितृनाथेन कुलमस्य द्विजन्मन: ।।
देवीभयात्पुनर्वान्तिं वान्तस्तस्माद्भवत्यसौ ।। ८२

वसिष्ठ उवाच :- इत्युक्त्वा ते द्विजा: सर्वे मुदिता: स्वगृहान् ययु: ।
वरूणास्य कुलं राजंस्तत: स्फीतिमविन्दत ।। ८३

ततो ये वान्तसंज्ञस्य द्विजस्यात्र कुलेऽभवन् ।
वान्ता इति समाख्याता: श्रीमालेऽद्यापि ते द्विजा: ।। ८४

-0-0-

ई बी १ वरूणास्ता

ई सी २ देव्यानिर्विदितेकाले वरूणास्यतत: स्नुषा ।

ई सी १ प्रयता जनयन्पुत्रं गुणाज्ञं पुण्यलक्षणाम्

ई तनयं जनयामासकुलवंश विवर्धन ।

ई बी २ अथ

बी ३ श्री माले भातनोत्

तदा प्रभृति सा देवी लोकानां वांच्छितप्रदा ।।
करुणाविरिति ख्याता श्रीमाले स्थितिमातनोत् ।। ८५

तत्राश्चर्यमिदं राजन्नद्यापि खलु दृश्यते ।
पुरस्ताज्जगतां मातुर्वने मुनिजनप्रिये ।। ८६

कृते भवन्ति पुन्नागास्त्रेतायां देवदारवः ।।
अशोका द्वापरे प्राप्ते कलौ कंटकिनो द्रुमाः ८७

एतते कथितं राजन् करुणाविकथानकम् ।।
इदं यः शृणुयाद्भक्त्या न स्यात्तस्य कुलत्रुटिः ।। ८८

-०-

इति श्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां ब्राह्म्य विभागे तृतीये परिच्छेदे श्रीमाल माहात्म्ये करुणावी माहात्म्यं नाम अष्टादशोऽध्यायः ।। १८ ।।